| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| यज्ञोपवीतरहितकर्त्तृकान्नभोजनम्। | स्नानं शतगायत्रीजपः उपवासश्च। | ० | ॥० पणाः। | यथाशक्ति। |
| रेतोमूत्रपुरीषाणामन्यतमस्य भक्षणम्। | ज्ञानतश्चान्द्रायणम्। | ८धेनवः। सार्द्धसप्तधेन्वसम्भवात् | २२॥० कार्षापणाः। | यथाशक्ति। |
| | अज्ञानतस्तप्तकृच्छ्रम्। | पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः। | ११।० कार्षापणाः। | यथाशक्ति। |
| | बलात्कारे प्राजापत्यम्। सर्व्वत्र द्विजातीनां पुनः संस्कारश्च। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| विण्मूत्रादिदूषितफलादिभक्षणम्। | संसर्गमात्रे कृच्छ्रपादः। | ० | ॥० पणाः। | यथाशक्ति। |
| | सन्निकृष्टे अर्थात् महत्संसर्गे कृच्छ्रार्द्धम्। एतत् रसास्वादनानुपलम्भनपक्षे अज्ञानतःसकृद्विषयम्। ज्ञानतो द्विगुणम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | रसाद्युपलम्भे तु गौतमोक्ततप्तकृच्छ्रं द्वादशाहसाध्यम्। अज्ञानत उपलम्भे अर्द्धम्। क्षत्त्रियादीनां पादपादह्रानिः। | पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः। | ११।० कार्षापणाः। | यथाशक्ति। |
| शूद्रोच्छिष्टभोजनम्। | अहोरात्रोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | अभ्यासे याज्ञवल्क्योक्तचतुरहसाध्यतप्तकृच्छ्रम्। | सपादधेन्वसम्भवात् २ धेनू। | ३॥० कार्षापणाः | यथाशक्ति। |
| ब्रह्मचारिणां मधुमांसभोजनम्। | ज्ञानतः प्राजापत्यम्। अज्ञानात् अर्द्धम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| ब्रह्मचारिणामामिषभाण्डपक्कान्नभोजनम्। | त्र्यहं कुशमूलविपक्कक्षीरपानमात्रम्। एतदज्ञानतः। | ० | १ कार्षापणः। | यथाशक्ति। |
| | ज्ञानतो द्विगुणम्। | ० | २ कार्षापणौ। | यथाशक्ति। |
| देवतातिथिभृत्यादिवर्जनभोजनम्। | अभ्यासे प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| अस्थ्यादिदूषितान्नभोजनम्। अस्थिश्च द्रोऽत्राभक्ष्यास्थिमात्रवचनम्। | स्नात्वार्कमर्च्चयित्वा घृतमात्राशनम्। | ० | ॥० पणाः। | यथाशक्ति। |
| मत्स्यकण्टकशम्बूकशङ्खशुक्तिकपर्द्दकभक्षणम्। | पञ्चगव्यमात्रभक्षणम्। | ० | ॥० पणाः। | यथाशक्ति। |
| पुंसवनसीमन्तोन्नयनकर्म्मणि भोजनम्। | ज्ञानाभ्यासे चान्द्रायणम्। | ८ धेनवः। | २२॥०कार्षापणाः | यथाशक्ति। |
| | अज्ञानाभ्यासे तदर्द्धम्। | ८ धेनवः। | ११।०कार्षापणाः | यथाशक्ति। |
| | सकृदज्ञाने विष्णूक्तकृच्छ्रपादः। | ० | ॥० पणाः। | यथाशक्ति। |
| | सकृज्ज्ञाने द्विगुणं कृच्छ्रार्द्धम्। | ० | १॥०कार्षापणः। | यथाशक्ति। |
| जातकर्म्मादिसंस्कारान्नभोजनम्। | अज्ञानतोऽसपिण्डानां द्व्यहसाध्यं सान्तपनम्। | ० | १ कार्षापणः। | यथाशक्ति। |
| | ज्ञानतो द्विगुणम्। | ० | २ कार्षापणौ। | यथाशक्ति। |
| भोजनकाले गुदस्रावः। | अहोरात्रमुषित्वा पञ्चगव्यपानम्। एतत् सकृन्निगीर्णग्रासे। | ० | ॥० पणाः। | यथाशक्ति। |
| | अत्यन्तग्रासाशने त्रिरात्रोपवासः। | ० | १॥०कार्षापणः। | यथाशक्ति। |
| भोजनकाले मृतसूतकाद्यशौचे तदन्नभक्षणम्। | ग्रासभोजने एकोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | सकलान्नभोजन त्रिरात्रोपवासः। | ० | १॥०कार्षापणः। | यथाशक्ति। |
| | अभोजने स्नानमात्रम्। | | | |
| तैलाभ्यङ्गादिस्नानार्हस्याकृतस्नानस्य भोजनम्। | स्नात्वा अष्टोत्तरसहस्रगायत्रीजपः। अभ्यासे प्रायश्चित्तावृत्तिः। | ० | ० | ० |